श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टात्रिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टात्रिंशं दशकम् ॥

## श्रीकृष्णावतारवर्णनम्

आनन्दरूप भगवन्नयि तेऽवतारे
प्राप्ते प्रदीप्तभवदङ्गनिरीयमाणैः।
कान्तिव्रजैरिव घनाघनमण्डलैर्द्या -
मावृण्वती विरुरुचे किल वर्षवेला ॥ 38.1 ॥

आशासु शीतलतरासु पयोदतोयै -
राशासिताप्तिविवशेषु च सज्जनेषु।
नैशाकरोदयविधौ निशि मध्यमायां
क्लेशापहस्त्रिजगतां त्वमिहाऽविरासीः ॥ 38.2 ॥

बाल्यस्पृशाऽपि वपुषा दधुषा विभूतीः
उद्यत्किरीटकटकाङ्गदहारभासा।
शङ्खारिवारिजगदापरिभासितेन
मेघासितेन परिलेसिथ सूतिगेहे ॥ 38.3 ॥

वक्षःस्थलीसुखनिलीनविलासिलक्ष्मी -
मन्दाक्षलक्षितकटाक्षविमोक्षभेदैः।
तन्मन्दिरस्य खलकंसकृतामलक्ष्मी -
मुन्मार्जयन्निव विरेजिथ वासुदेव ॥ 38.4 ॥

शौरिस्तु धीरमुनिमण्डलचेतसोऽपि
दूरस्थितं वपुरुदीक्ष्य निजेक्षणाभ्याम्।

आनन्दबाष्पपुलकोद्गमगद्गदार्द्र -
स्तुष्टाव दृष्टिमकरन्दरसं भवन्तम् ॥ **38.5** ॥

देव प्रसीद परपूरुष तापवल्ली -
निर्लूनदात्र समनेत्र कलाविलासिन्।
खेदानपाकुरु कृपागुरुभिः कटाक्षै -
रित्यादि तेन मुदितेन चिरं नुतोऽभूः ॥ **38.6** ॥

मात्रा च नेत्रसलिलास्तृतगात्रवल्या
स्तोत्रैरभिष्टुतगुणः करुणालयस्त्वम्।
प्राचीनजन्मयुगलं प्रतिबोध्य ताभ्यां
मातुर्गिरा दधिथ मानुषबालवेषम् ॥ **38.7** ॥

त्वत्प्रेरितस्तदनु नन्दतनूजया ते
व्यत्यासमारचयितुं स हि शूरसूनुः।
त्वां हस्तयोरधृत चित्तविधार्यमार्यै -
रम्भोरुहस्थकलहंसकिशोररम्यम् ॥ **38.8** ॥

जाता तदा पशुपसद्मनि योगनिद्रा
निद्राविमुद्रितमथाकृत पौरलोकम्।
त्वत्प्रेरणात् किमिव चित्रमचेतनैर्यद् -
द्वारैः स्वयं व्यघटि सङ्घटितैः सुगाढम् ॥ **38.9** ॥

शेषेण भूरिफणवारितवारिणाऽथ
स्वैरं प्रदर्शितपथो मणिदीपितेन।
त्वां धारयन् स खलु धन्यतमः प्रतस्थे
सोऽयं त्वमीश मम नाशय रोगवेगान् ॥ **38.10** ॥

॥ इति श्रीमन्नारायणीये अष्टात्रिंशं दशकं समाप्तम् ॥